करस्तु सः। दश वर्षसहस्राणि तपस्तप्त्वा महातपाः। जनयत् पावकं घोरं पितॄणां स प्रजाः सृजत्। बृहद्रथन्तरं मूर्द्ध्नो वक्त्राद्वा तरसा हरौ। शिवं नाभ्यां बलादिन्द्रं वाय्वग्नी प्राणतोऽसृजत्। बाहुभ्यामनुदात्तौ च विश्वाभूतानि चैव ह। एतान् दृष्ट्वा ततः पञ्च पितॄणामसृजत् सुतान्। बृहद्रथस्य प्रणिधिः कश्यपस्य महत्तरः। भानुरङ्गिरसो धीरः पुत्रो वर्च्चस्य सौभरः। प्राणस्य चानुदात्तस्तु व्याख्याताः पञ्चविंशतिः। देवान् यज्ञमुषश्चान्यान् सृजत् पञ्चदशोत्तरान्। सुभीममतिभीमञ्च भीमं भीमबलाबलम्। एतान् यज्ञमुषः पञ्च देवानां ह्यसृजत्तपः। सुमित्रं मित्रवन्तञ्च मित्रज्ञं मित्रवर्द्धनम् मित्रधर्म्माणमित्येतान् देवानभ्यसृजत्तपः। सुरप्रवीरं वीरञ्च सुरेशं सुरवर्च्चसम्। सुराणामपि हन्तारं पञ्चैतान सृजत्तपः। त्रिविधं संस्थिता ह्येते पञ्च पञ्च पृथक् पृथक्। मुष्णन्त्यत्र स्थिता ह्येते स्वर्गतो यज्ञयाजिनः। तेषामिष्टं हरन्त्येते निघ्नन्ति च महद्धविः। स्पर्द्धया हव्यवाहानां निघ्नन्त्येते हरन्ति च। द्यां वह्निर्वै तदादानं कुशलैः संप्रवर्त्तितम्। तदेते नोपसर्पन्ति यत्र चाग्निः स्थितो भवेत्। चिताग्नेरुद्वहन्त्याज्यं पक्षाभ्यां तत् प्रवर्त्तितम्। मन्त्रैः प्रशमिता ह्येते नष्टं मुष्णन्ति यज्ञियम्। बृहदुकथस्तपसैव पुत्त्रो भूमिमुपाश्रितः। अग्निहोत्रे हूयमाने पृथिव्यां सद्भिरिज्यते। रथन्तरश्च तपसः पुत्त्रोऽग्निः परिपठ्यते। मित्रविन्दाय वै तस्मै हविरध्वर्य्यवो विदुः। मुमुदे परमप्रीतः सह पुत्त्रैर्महायशाः। २१९ अ०

गुरुभिर्नियमैर्जातो भरतो नाम पावकः। अग्निः पुष्टिमतिर्नाम तुष्टः पुष्टिं प्रयच्छति। भरत्येष प्रजाः सर्वास्ततो भरत उच्यते। अग्निर्यश्च शिवो नाम शक्तिपूजापरश्च सः। दुःखार्त्तानाञ्च सर्व्वेषां शिवकृत् सततं शिवः। तपसस्तु फलं दृष्ट्वा सम्प्रवृद्धं तपो महत्। उद्धर्त्तुकामो मतिमान् पुत्त्रो जज्ञे पुरन्दरः। ऊष्मा चैवोष्मणो जज्ञे सोऽग्निर्भूतेषु लक्ष्यते। अग्निश्चापि मनुर्नाम प्राजापत्यमकारयत्। शम्भुमग्निमथ प्राहुर्ब्राह्मणा वेदपारगाः। आवसथ्यं द्विजाः प्राहुर्दीप्तमग्निं महाप्रभम्। ऊर्ज्जस्करान् हव्यवाहान् सुवर्णसदृशप्रभान्। ततस्तपो ह्यजनयत् पञ्च यज्ञसुतानिह। प्रशान्तोऽग्निर्महाभाग। परिश्रान्तो गवाम्पतिः। असुरान् जनयन् घोरान्मर्त्यांश्चैव पृथग्विधान्। तपसश्च मनुं पुत्त्रं भानुञ्चाप्यङ्गिराः सृजत्।

बृहद्भानुन्तु तं प्राहुर्ब्राह्मणा वेदपारगाः। भानोर्भार्य्या सुप्रजा तु बृहद्भासा तु सूर्य्यजा। असृजेतान्तु षट् पुत्त्रान् शृणु तेषां प्रजाविधिम्। दुर्ब्बलानान्तु भूतानामसून् यः सम्प्रयच्छति। तमग्निं बलदं प्राहुः प्रथमं भानुतः सुतम्। यः प्रशान्तेषु भूतेषु मन्युर्भवति दारुणः। अग्निः स मन्युमान्नाम द्वितीयो भानुतः सुतः। दर्शे च पौर्णमासे च यस्येह हविरुच्यते। विष्णुर्नामेह योऽग्निस्तु धृतिमान् नाम सोऽङ्गिराः। इन्द्रेण सहितं यस्य हविराग्रयणं स्मृतम्। अग्निराग्रयणो नाम भानोरेवान्वयस्तु सः। चातुर्म्मास्येषु नित्यानां हविषां यो निरग्रहः। चतुर्भिः सहितः पुत्त्रैर्भानोरेवान्वयस्तु सः। निशा त्वजनयत् कन्यामग्नीषोमावुभौ तथा। भानोरेवाभवद्भार्य्या सुषुवे पञ्च पावकान्। पूज्यते हविषाग्र्येण चातुर्म्मास्येषु पावकः। पर्जन्यसहितः श्रीमानग्निर्वैश्वानरस्तु सः। अस्य लोकस्य सर्व्वस्य यः प्रभुः परिपठ्यते। सोऽग्निर्विश्वपतिर्नाम द्वितीयो वै मनोः सुतः। ततः स्विष्टं भवेदाज्यं स्विष्टकृत् परमस्तु सः। कन्या सा रोहिणी नाम हिरण्यकशिपोः सुता। कर्म्मणाऽसौ बभौ भार्य्या स वह्निः स प्रजापतिः। प्राणानाश्रित्य यो देहं प्रवर्त्तयति देहिनाम्। तस्य सन्निहितो नाम शब्दरूपस्य साधनः। शुक्लकृष्णगतिर्देवो यो बिभर्त्ति हुताशनम्। अकल्मषः कल्मषाणां कर्त्ता क्रोधाश्रितस्तु सः। कपिलं परमर्षिञ्च यम्प्राहुर्यतयः सदा। अग्निः स कपिलो नाम साङ्ख्ययोगप्रवर्त्तकः। अग्रं यच्छन्ति भूतानां येन भूतानि नित्यदा। कर्म्मस्विह विचित्रेषु सोऽग्रणीर्वह्निरुच्यते। इमानन्यान् समसृजत् पावकान् प्रथितान् भुवि। अग्निहोत्रस्य दुष्टस्य प्रायश्चित्तार्थमुल्वणान्। संस्पृशेयुर्यदाऽन्योऽन्यं कथञ्चिद्वायुनाऽग्नयः। इष्टिरष्टाकपालेन कार्य्या वै शुचयेऽग्नये। दक्षिणाग्निर्यदा द्वाभ्यां संसृजेत तदा किल। इष्टिरष्टाकपालेन कार्य्या वै वीतयेऽग्नये। यद्यग्नयो हि स्पृश्येयुर्निवेशस्था दवाग्निना। इष्टिरष्टाकपालेन कार्य्या तु शुचयेऽग्नये। अग्निं रजस्वला वै स्त्री संस्पृशेदग्निहोत्रिकम्। इष्टिरष्टाकपालेन कार्य्या दस्युमतेऽग्नये। मृतः श्रूयेत यो जीवः परेयुः पशवो यदा। इष्टिरष्टाकपालेन कार्य्या सुरमतेऽग्नये। आर्त्तो न जुहुयादग्निं त्रिरात्रं यस्तु ब्राह्मणः। इष्टिरष्टाकपालेन कार्य्या स्वादुत्तराग्नये। दर्शञ्च पौर्णमासञ्च यस्य तिष्ठेत् प्रतिष्ठितम्। इष्टिरष्टाकपालेन कार्य्या रतिकृतेऽग्नये।